Sec-B, Unit-I

২. শ্রীমদ্ভগবদ্গীতার অনুসারে গুণ ও কর্ম কী?

⇒ एकदा वर्णेन गात्रवर्णः बोधितः। अनन्तरं ब्राह्मणादि जात्यर्थे प्रचलितः। महाभारते पद्मपुराणे च उक्ते शुभ्रवर्णेन ब्राह्मणः, रक्तवर्णेन क्षत्रियवर्णः, पीतवर्णेन वैश्यवर्णः कृष्णवर्णेन च शूद्रवर्णः जाताः। प्रधानतः वस्तुतः शास्त्रेण उक्तं श्वेतवर्णेन सत्त्वगुणः, रक्तवर्णेन रजोगुणः कृष्णवर्णेन च तमोगुणः बोध्यन्ते। सम्भवतः तस्य हेतोः श्वेतरक्तपीतादिना ब्राह्मणक्षत्रियवैश्यानां भेदः निरूपितः, अतः गुणानुसारेण अस्य भेदस्य नाम वर्णभेदः भवति,

श्रीमद्भगवद्गीतायां श्रीकृष्णेन उक्तम्—

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥" (४/१३)

अत्र गुणेन सत्त्वं, रजः, तम इति गुणत्रयं बोध्यते। सत्त्वप्रधानं ब्राह्मणः, तस्य कर्म अध्यापनादिः। अल्पसत्त्वगुणविशिष्टः रजप्रधानं क्षत्रियः, तस्य कर्म युद्धविग्रहादिः। अल्पतमोगुणयुक्तः रजःप्रधानं वैश्यः, तस्य कर्म कृषिवाणिज्यादिः। तमप्रधानं शूद्रः, तस्य कर्म ब्राह्मणक्षत्रियवैश्यानां परिचर्या। अनेन प्रकारेण गुणानुसारे कर्मविभागं कृत्वा चातुर्वर्ण्यस्य सृष्टिरभूत्। अतः जन्मना जातिविभागः न भवति। गुणेन कर्मणा च विभागः भवति। ब्राह्मणस्य पुत्रः ब्राह्मणः एव भवति इति, न केवलं सत्त्वगुणप्रधानेन शूद्रपुत्रोऽपि ब्राह्मणः भविष्यति। प्रकारान्तरेन यदि ब्राह्मणपुत्रः तमोगुणप्रधानं अभविष्यत् तर्हि स शूद्र इति अभविष्यत्।

श्रीमद्भगवत्गीतायां (१८.४१-४४) —
18 . 41-44

ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥ (४१)
शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥ (४२)
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥ (४३)
कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥ (४४)

वर्णचतुष्टयस्य कर्म निर्दिष्टम्। श्रीकृष्णमते स्वभावजातगुणानुसारेणैव ब्राह्मणक्षत्रियादीनां कर्म पृथक् पृथक् भवति—

कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः। शमदमतपः शौच-
-क्षमासरलताज्ञानविज्ञानश्रद्धादयः ब्राह्मणस्य स्वभावजानि कर्माणि,
पराक्रमतेजोधैर्यकार्यनिपुणतायुद्धविग्रहदानशासनादयोः क्षत्रियस्य
स्वभावजानि कर्माणि, कृषिगोरक्षावाणिज्यादयः वैश्यस्य स्वभाव-
जानि कर्माणि सेवात्मककर्म च शूद्रस्य स्वभावजं कर्म।